दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-168 | 1 | अप्रैल 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णाष्टमी
चैत्र 27 प्रविष्ठांशः मङ्गलमयः भवेत्

2 सीबीएसई-विद्यालयेषु छात्र-नामाङ्कने वृद्धिः, मुख्यमन्त्रिणा त्रयाणां सङ्कायानां प्रारम्भाय निर्देशः प्रदत्तः

3 हिमकेयर- योजनान्तर्गतं संपुट-भुक्त्यै परिवर्तनम्, योजनां पारदर्शिनीं कर्तुं महत्त्वाकांक्षी प्रयासः

4 निर्वाचनम् 2026: त्रिषु राज्येषु मतदानस्य कीर्तिमानम्, असमस्य इतिहासे प्रथमवारं 85.38 प्रतिशतं मतदानम्

## भाजपा कृषकाणां कल्याणाय प्रतिबद्धः – प्रधानमन्त्री, ममता बनर्जी महोदयायाः मीनाखान-स्थले जनसभा




भाजपादलस्य वरिष्ठो नरेन्द्र मोदी प्रोक्तवान् यत् पश्चिम बंगाले भाजपादलस्य शासनं कृषकाणां कल्याणाय प्रतिबद्धम्। पश्चिम बंगालस्य हल्दिया स्थले जनसभां सम्बोधनयन् श्री मोदी समुदीरितवान् यत् विधानसभा निर्वाचनानन्तरं भाजपादलस्य शासने कृषकेभ्यः बहुलाभो भविष्यति, इति निश्चितम् । अपरत्र तृणमल कांग्रेस दलस्य प्रमुखा ममता बनर्जी उत्तर-परगना जनपदस्य मीनाखान-स्थले एकां जनासभां सम्बोधितवती ।

## विदेशसचिवः विक्रममिसरी रक्षा-उपसचिवेन सह वाशिङ्गटन-नगरे रक्षासहभागित्वविषये चर्चामकरोत्



विदेश सचिवः विक्रममिसरी अमेरिकायाः 'वाशिंगटन' अत्यत्र अधिग्रहण- सम्बद्ध चर्चायै रक्षा उपसचिवेन माइकल पी. डफी इत्यमुना मेलनं कृतवान्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः संचारतन्त्रे पटले विज्ञापितवान् यत् एतस्य उपवेशनस्य उद्देश्यं भारत-अमेरिका- देशयोः प्रमुख सहभागित्वस्य सम्वर्द्धनं वर्तते।

## गुजरात-वायुसेनासम्बन्धे पाकिस्तानस्य मिथ्याप्रचारः सूचना-ब्यूरोद्वारा खण्डितः

भारत- शासनेन पाकिस्तान द्वारा प्रसारितायाः तस्याः सूचनायाः खण्डनं कृतं यत्र प्रसारितमासीत् यत् गुजरात स्थेन भारतीय वायुसैन्य द्वारा इजरायल विमानानि साहाय्यप्रदत्तानि आसन्। सूचना-ब्यूरो-इत्येत द्वारा स्पष्टीकृतं यत् एतत् तथ्यं पूर्णतया भ्रामकम्

## असम-केरल- पुदुचेरी इत्यत्र विधानसभा निर्वाचनाय मतदानम् सम्पन्नम्




असम-केरल- पुदुचेरी इत्यत्र विधानसभा निर्वाचनाय मतदानम् सम्पन्नम्। असम-प्रदेशे षड्विंशत्युत्तर-शतं-आसन्देभ्यः, केरल प्रदेशे चत्वारिंशदुत्तर शतम्-आसन्देभयः पुदुचेरी-केन्द्रशासित प्रदेशे च विंशत् आसन्देभ्यः यतदानम् अन्ध सम्पन्नम् । निर्वाचायोगेन स्वतन्त्र-निष्पक्ष - शान्तिपूर्ण मतदान सुनिश्चितीकरणदिशि सुदृढ सुरक्षा-व्यवस्था कृता। नागालैंड इत्यत्र कोरिडांग विधानसभा-उपनिर्वाचने त्रिंशत्-आसन्देभयः मतदानम् अद्य सम्पनम्। अपरत्र पश्चिम बंगाले प्रथम चरणस्य मतदानाय नामांकनाय अन्तिमा तिथिः अद्य। असम-केरल-तमिलनाडु-पश्चिम बंगाल- पुदुचेरी इत्येतेषु प्रदेशेषु मतगणना मे मासस्य चतुर्थे दिनांके भविष्यति।

## कृषिशिखरसम्मेलनम्-: कृषकाणां आयवर्धनाय कृषिकारितायाः महत्त्वे कृषिराज्यमन्त्री भागीरथ चौधरी महोदयस्य बलम्




कृषिराज्यमन्त्री कृषक कल्याणमन्त्री च भारीरथः चौधरी देशस्य कृषि परिदृश्ये परितर्वनाय कृषकाणं आय-सम्बर्द्धनाय कृषिकारितायाः महत्वे वलं दत्तवान्। नवदेहल्यां समायोजितं भारत-कृषिकारिता- शिखर सम्मेलनं सम्बोधयन् श्री चौधरी प्रोक्तवान् यत् कृषि-क्षेत्रं सम्प्रति सुदृढं दरीदृश्यते यच्च ग्रामणी आजीविकायै राष्ट्रीय खाद्य सुरक्षायै सुदृढ आधारं प्रददाति ।

पश्चिम-एशिया-सङ्कटसत्त्वेऽपि देशे एलपीजी-आपूर्तिः औषधीनां मूल्यानि च स्थिराणि – सुजाता शर्मा

पश्चिम एशिया संङ्कटे नवदेहल्यां समायोजिते अन्तर-मन्त्रालयीय वर्ताहर-मेलने स्पष्टीकृतं यत् सङ्कट कारणेन वैश्विक आपूर्ति श्रृखलानां व्यवधानानन्तरमपि औषधीनां तत्सम्बद्ध उत्पादानां मूल्येषु न महती वृद्धिः जाता। पैट्रोलियम प्राकृतिक वातीन्धन मन्त्रालयस्य संयुक्त-सचिव-पदासीना सुजाता शर्मा विज्ञापितवती यत् शासने गृहोपयोगाय एलपीजी इत्यादीनां शत-प्रतिशन्मिता आपूर्तिः सुनिश्चीकृता। अग्रे प्रोक्तवती यत् देशे पर्याप्तं भण्डारं समुपलब्धम्, न तत्र कापि समस्या।

## उत्तरसिक्किमस्य लाचेनक्षेत्रे भूस्खलनग्रस्तानां साहाय्यार्थं भारतीयसैन्यस्य 'हिमसेतु' अभियानं प्रारब्धम्



भारतीय सैन्य बलानां त्रिशक्तिकोरेण उत्तरी सिक्किमक्षेत्रस्य लाचेन इत्यत्र भूस्खलन-दुष्प्रभावितानां साहाय्यै हिमसेतु-अभियानं समारब्धम् । भूस्खलन कारणेन उत्तरी सिक्किममस्य लाचेन चुंगथांग इत्युभययोः मध्ये सम्पर्कः बाधितः येन क्षेत्रे आवागमनं दुष्प्रभावितम्। साम्प्रतं यावत् पञ्चाशदधिकशतं पर्यटकाः सुरक्षितरूपेण निष्कासिताः सन्ति।

## भारतीयलोकतन्त्राय महिला-आरक्षणम् अनिवार्यम्, विलम्बः दुर्भाग्यपूर्णः – प्रधानमन्त्री मोदी

प्रधानमंत्री नरेन्द्र मोदी प्रोक्तवान् यत् विधानमडण्ले महिलाभ्यः आरक्षणं भारतीय लोकतन्त्राय अति महत्वपूर्णम् । स्वीय- सम्पादकीये स्वविचारान् प्रकटयन् श्री मोदी समुदीरितवान् यत् एतस्य आरक्षणस्य प्रर्वतने विलम्बः दुर्भाग्यपूर्णः स्यात्। एकं दृश्यश्रव्य चित्रं विनिमयी कुर्वन् प्रधानमंत्री चर्चायै अथ पारितकरणाय प्रोक्तवान् यत् महिलाभ्यः सम्बद्धे महत्वपूर्ण विधेयके संसदः सत्रं मासस्य अस्य षोडशे दिनांके समाहूतं वर्तते। प्रधानमंत्री महिलानां योगदानं प्रकटयन् प्रोक्तवान् यत् विज्ञानं प्रविधिः, उद्यमिता, सशस्त्रबलानि, सङ्गीतं, कला, सर्वत्र महिलानां अग्रणी भूमिका वर्तते। प्रधानमंत्री प्रोक्तवान् यत् यदा महिलाः प्रशासने सक्रिय भमिकां निर्वाहयन्ति।

## सुभाषितम्

**शोको नाशयते धैर्यं,**
**शोको नाशयते श्रुतम्।**
**शोको नाशयते सर्वं,**
**नास्ति शोकसमो रिपुः।।**

भावार्थः- शोक में मनुष्य का धैर्य नष्ट हो जाता है तथा उसका विवेक और ज्ञान भी नष्ट हो जाता है। फलस्वरूप उसका सब कुछ नष्ट हो जाता है। अतः शोक के समान अन्य कोई शत्रु नहीं होता है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्



## एशिया-मुष्टामुष्टि-चैम्पियनशिप्-प्रतिस्पर्धायां भारतीयमहिलाभिः त्रीणि स्वर्णपदकानि विजितानि

मंगोलिया- इत्यत्र समायोज्यमाने एशिया मुष्टामुष्टि चैम्पियनशिप द्वन्द्वे अद्य त्रीणि सर्णपदकानि एकं रजतपदकं च विजित्य भारतीय महिला मुष्टामुष्टि-क्रीडिकाभिः उत्कृष्टं प्रदर्शनं कृतम् ।

## आयुष-शेट्टी एशिया-चैम्पियनशिप्-क्रीडायाः प्रागुपान्त्यचक्रे प्रविष्टः

बैडमिन्टन एशिया चैम्पियनशिप प्रतिस्पर्धायां आयुष-शेट्टी इत्यसौ इत्येतेन पुरुषेकलवर्गस्य प्रागुपान्त्यनं प्राविशत्। तेन ची यू जेन-इत्येत एकविंशतिः षोडश, एकविंशतिः - द्वादश-इत्यन्तरालैः पराजितम्।

# सीबीएसई-विद्यालयेषु छात्र-नामाङ्कने वृद्धिः, मुख्यमन्त्रिणा त्रयाणां सङ्कायानां प्रारम्भाय निर्देशः प्रदत्तः



**हिमसंस्कृतवार्ताः- शिमला।** अस्मिन् वर्तमान-शैक्षणिक-सत्रे राज्यस्य १५१ सर्वकारीय-विद्यालयेषु सीबीएसई-पद्धतिः (CBSE Pattern) प्रवर्तितः अस्ति। सर्वकारस्य मतेन सम्पूर्णे हिमाचलप्रदेशे विद्यालयेषु छात्र-प्रवेशे उल्लेखनीया वृद्धिः दृष्टा। एतां प्रोत्साहिकां प्रतिक्रियां दृष्ट्वा मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः निर्देशं दत्तवान् यत् एतेषु सर्वेषु विद्यालयेषु प्रशिक्षित- स्नातक- विज्ञानं, प्रशिक्षित-स्नातक- गणितः, वाणिज्यम् इति त्रयः अपि सङ्कायाः प्रारब्धव्याः। तेन शिक्षाविभागः निर्दिष्टावधौ सर्वाः आवश्यकाः सज्जाः पूर्णं कर्तुं आदिष्टः, येन छात्राः गुणवत्तापूर्णां शिक्षां प्राप्तुं शक्नुयुः। शिक्षाविभागानुसारं सीबीएसई-पद्धतेः प्रवर्तनानन्तरं विविधेषु विद्यालयेषु छात्र-नामाङ्कने विशिष्टा वृद्धिः अङ्किता अस्ति। चम्बा-मण्डलस्य राजकीय- वरिष्ठ- माध्यमिक-विद्यालये किलाड़ इत्यत्र ९०.२४ प्रतिशतं वृद्धिः अभवत्, यदा तु मण्डी-मण्डलस्य जञ्जैहली इत्यत्र ९०.४३ प्रतिशतं वृद्धिः अङ्किता। किन्नौरस्य रिकाङ्गपिओ इत्यत्र ५०.५० प्रतिशतं, शिमलायाः नेरवा इत्यत्र ५२.२२ प्रतिशतं, घनाहट्टी इत्यत्र २६.२७ प्रतिशतं वृद्धिः अभवत्। एतदतिरिच्य लाहौल- स्पीति- मण्डलस्य काजा इत्यत्र २३.४० प्रतिशतं, शिमलायाः ठियोग इत्यत्र १६.१९ प्रतिशतं, सिरमौरस्य नौहराधार इत्यत्र २९.६९ प्रतिशतं, शिमलायाः चौपाल-स्थित- राजकीय- वरिष्ठ- माध्यमिक- विद्यालये २८.१६ प्रतिशतं वृद्धिः अङ्किता। अन्यस्थानेष्वपि छात्राणां सङ्ख्यायां वर्धनं दृष्टम्। मुख्यमन्त्रिणा उक्तं यत् प्रदेशे काङ्ग्रेस- सर्वकारस्य गठनानन्तरं शिक्षाक्षेत्रे सुधाराय बहवः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। अस्य परिणामस्वरुपं हिमाचलप्रदेशः अधुना गुणवत्तापूर्ण- शिक्षायाः विषये देशे २०२१ वर्षस्य क्रमानुसारं २१ तम स्थानात् पञ्चम-स्थानं प्राप्तवान् अस्ति। अपि च प्रदेशः पूर्ण-साक्षर-राज्यस्य गौरवं प्राप्तवान्। सः अवदत् यत् सर्वकारः ग्रामीणक्षेत्राणां छात्रेभ्यः अपि गुणवत्तापूर्णां शिक्षां प्रदातुं प्रतिबद्धः अस्ति तथा भविष्ये अस्मिन् दिशि अन्यान्यपि कठोर्याणि पदानि स्थापयितुं प्रयतते।

# स्थानान्तरण-प्रतिबन्धान्तरमपि शिक्षाविभागे 'डीओ नोट' इत्येतेषां राशिः, सप्तशताधिकानि (७००) पत्राणि प्राप्तानि




**हिमसंस्कृतवार्ताः- शिमला।**
प्रतिबन्धस्य मध्ये अपि हिमाचलप्रदेशे नूतन-शैक्षणिकसत्रस्य आरम्भेण सहैव शिक्षकाणां स्थानान्तरणाय स्पर्धा आरब्धा। शिक्षाविभागे स्थानान्तरणार्थम् अनुशंसानां एतादृशः समूहः एकत्रितः जातः यत् कतिपयेषु दिनेषु एव शिक्षामन्त्रिणः समीपे ७०० तः अधिकाः 'डीओ नोट' पत्राणि प्राप्तानि। एतेषु प्रायः ५०० सञ्चिकाः मुख्यमन्त्रि-कार्यालयं प्रति प्रेषिताः, अवशिष्टाः तु विभागीयस्तरे परीक्ष्यन्ते। राज्ये सद्यः एव सामान्य- स्थानान्तरणेषु सर्वकारेण निरोधः प्रयुक्तः, तथापि शिक्षाविभागेन सम्बद्धानां स्थानान्तरण-पत्राणां संख्या न न्यूनीभवति। गुरुवासरे सचिवालयं बहवः शिक्षकाः स्व-आवेदनानां स्थितिं ज्ञातुं शिक्षामन्त्रिणः रोहितठाकुरस्य समीपं प्राप्तवन्तः। टीजीटी, पीजीटी, जेबीटी इत्यादि-श्रेणीनां शिक्षकाः नूतनसत्रस्य आरम्भे स्व-अनुकूलस्थानेषु 'समायोजनाय' प्रयतन्ते। विशेषतः नगरीय- सुगमक्षेत्रेषु पदस्थापनां प्राप्तुं शिक्षकाणां मध्ये महती प्रतिस्पर्धा वर्तते। स्थानान्तरण-विषये शिमलास्थित-सचिवालये अद्यत्वे विधायकानां काङ्ग्रेस-नेतॄणां च आवागमनं बहु वर्धितम्। बहवः जनप्रतिनिधयः स्वक्षेत्राणां शिक्षकाणाम् अनुशंसां नीत्वा शिक्षामन्त्रिणं उच्चाधिकारिणः च मिलन्ति।

### शिक्षणं बाधितं न भवेत्, इति निर्णयः

प्रदेशे विगतवर्षद्वयात् चलति शैक्षणिकसत्रे शिक्षकाणां नियमित-स्थानान्तरणं न क्रियते। विद्यालयेषु पाठनकार्यं बाधितं न भवेत् इति विचार्य एषः निर्णयः स्वीकृतः। अतः अधुना नूतनसत्रस्य आरम्भे एव महत्यां संख्यायां अनुशंसा-पत्राणि आगच्छन्ति। अन्यतः, शिक्षामन्त्री रोहितठाकुरः पूर्वमेव स्पष्टीकृतवान् यत् केवलं स्वास्थ्य- पारिवारिक-प्रशासनिककारणेषु एव विचारः भविष्यति। अतः अधिकांशः शिक्षकाः स्वप्रकरणानि 'विशेष-श्रेण्यां' प्रदर्शयितुं चेष्टन्ते। विगत-दिनद्वये विद्यालय-शिक्षा-निदेशालयात् प्रायः २०० शिक्षकाणां स्थानान्तरण-आदेशाः निर्गताः।

### एलडीआर- उत्तीर्ण- एसएमसी- शिक्षकेभ्यः संबलम्

सीमित-प्रत्यक्ष-भर्ती (LDR) परीक्षां उत्तीर्णवद्भ्यः एसएमसी-शिक्षकेभ्यः सर्वकारेण महदाश्रयः दत्तः। परीक्षां उत्तीर्णवन्तः एते शिक्षकाः अधुना नूतनस्थाने प्रेषणस्य स्थाने तेषां वर्तमानेषु विद्यालयेषु एव नियमित-नियुक्तिं प्राप्स्यन्ति। अस्मात् निर्णयात् शताधिकानां शिक्षकाणां लाभः भविष्यति ये नियमितीकरणानन्तरं स्थानान्तरणविषये सन्दिग्धाः आसन्। शिक्षामन्त्रिणः कथनानुसारं अनेन विद्यालयेषु स्थिरता स्थास्यति शिक्षणकार्यं च सुचारु भविष्यति।

# HP WEATHER - रोहताङ्ग-भरमौर-पाङ्गी-शिखरेषु हिमपातः, भरमौर-पठानकोट-राष्ट्रियमार्गे भूस्खलनम्



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे गुरुवासरे प्रातःकाले सर्वेषु क्षेत्रेषु आकाशः स्वच्छः आसीत्। परन्तु मध्याह्नोत्तरं ऋतुपरिवर्तनेन रोहताङ्ग-भरमौर-पाङ्गी-उच्चशिखरेषु हिमपातः संजातः। काङ्गड़ा, धर्मशाला, मण्डी, शिमला क्षेत्रेषु मेघाः वर्षितवन्तः। अन्यजनपदेषु तु आतपः प्रखरः आसीत्। भूस्खलनेन भरमौर-पठानकोट-राष्ट्रियमार्गः अवरुद्धः अभवत्। अटल-कन्दरायाः कृते सामान्यानां वाहनानां गमनागमनं निषिद्धम्, केवलं 'फोर-वाई-फोर' (4x4) वाहनानि एव प्रेष्यन्ते। काङ्गड़ा-जनपदे करकापातेन (ओलावृष्टि) गोधूम-सस्यस्य शाकानां च महती हानिः अभवत्। राजधानी-शिमलायां गुरुवासरे दिने १:०० वादने सघनवृष्टिः अभवत्। सायं ३:०० वादनान्तरं नगरस्य अधिकांशभागेषु वर्षा अभवत्, यद्यपि सायङ्काले पुनः आकाशः स्वच्छः जातः। भरमौर-पाङ्गी-क्षेत्रस्य उच्चशिखरेषु ५.०८ सेन्टीमीटर् परिमितं हिमपातः अभवत्। 'बत्ती दी हट्टी' स्थाने बुधवासरे रात्रौ भूस्खलनेन भरमौर-पठानकोट-मार्गः पिहितः। सलूणी-पाङ्गी क्षेत्रयोः द्वौ मार्गौ अवरुद्धौ स्तः, ६५ ग्रामेषु विद्युत्-सेवा अपि बाधिता अस्ति।

### किन्नौर-लाहौल क्षेत्रयोः पुनः शून्यतः न्यूनं तापमानाङ्कः

प्रदेशे ऋतुपरिवर्तनेन किन्नौर-लाहौल-स्पीति क्षेत्रयोः रात्रेः तापमानं पुनः शून्यतः न्यूनं जातम्। बुधवासरे रात्रौ कल्पायां -०.२, कुकुमसेरी क्षेत्रे च -०.३ डिग्री सेल्सियस तापमानाङ्कः अभवत्। शिमलायां न्यूनतमं तापमानं ३.६, मनाल्यां ४.९, सोलन-नगरे ६.०, ताबो-क्षेत्रे ०.३ तथा धर्मशालायां ७.३ डिग्री सेल्सियस अभिलेखितम्।

### बन्दरोल क्षेत्रे भूस्खलनेन उपाहारगृहस्य भागः पतितः, नवोदयविद्यालयस्य भवनानि अपि सङ्कटापन्नानि

कुल्लू-जनपदस्य बन्दरोल क्षेत्रे गुरुवासरे प्रातः ९:०० वादने जातभूस्खलनेन एकस्य उपाहारगृहस्य (Hotel) भागः ध्वस्तः जातः। तस्य कश्चन भागः अधुना स्तम्भानां संबलेन आकाशे एव लम्बते। अनेन सहैव 'जवाहर- नवोदय-विद्यालयः' (JNV) इत्यस्य कोटिरूप्यकाणां भवनानि अपि सङ्कटग्रस्तानि सन्ति। भूस्खलनेन जनसामान्यानां मध्ये भयं व्याप्तम् अस्ति। भूमौ विदराणाम् (Cracks) आगमनेन स्थितिः गम्भीरा वर्तते। रात्रौ निरन्तर-वृष्ट्या 'व्यू इन् बाई रिवर साइड' इति उपाहारगृहस्य भागः व्यास-नद्यां पतितः। यदि वर्षा निरन्तरा भविष्यति, तर्हि सम्पूर्णं भवनं नद्यां पतितुं शक्नोति। स्थानीयाः जनाः वदन्ति यत् २०२३ वर्षस्य प्रलयानन्तरं व्यास-नद्याः निरन्तरं जल-क्षरणेन स्थितिः एतादृशी संजाता। प्रशासनतः नद्याः तटीकरणस्य (Embankment) अभ्यर्थना वारं वारं कृता आसीत्। विद्यालयात् कतिपय-मीटर् दूरे जातभूस्खलनेन छात्राणां सुरक्षां प्रति अभिभावकाः चिन्तिताः सन्ति। उपायुक्तः अनुरागचन्द्रशर्मा उक्तवान् यत् क्षतेः प्रतिवेदनं स्वीक्रियते, तदनन्तरं आगामि-निर्देशाः निर्गमिष्यन्ति।

# अवरसचिवः पवनकुमारः शिक्षाविभागे नियुक्तः

राज्यसर्वकारेण सचिवालय-सेवायाः द्वौ अधिकारिणौ पदोन्नतिं दत्त्वा अवरसचिवौ (Under Secretary) कृतौ। अस्मिन् पवनकुमारः पदोन्नतिं प्राप्य शिक्षाविभागे अवरसचिवत्वेन नियुक्तः। सी. लाल महोदयः विधि-विभागे, अवरसचिवः नियुक्तः। सामान्य-प्रशासन-विभागे कार्यरता अवरसचिवः प्रमिलाशर्मा अधुना सामाजिक- न्याय- अधिकारिता-विभागस्य अतिरिक्तभारं वहिष्यति। कार्मिकविभागेन अस्मिन् प्रसङ्गे अधिसूचना निर्गता।

# हिमकेयर- योजनान्तर्गतं संपुट-भुक्त्यै परिवर्तनम्, योजनां पारदर्शिनीं कर्तुं महत्त्वाकांक्षी प्रयासः




**हिमसंस्कृतवार्ताः- शिमला।**मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु- महोदयस्य अध्यक्षतायाम् आयोजितायां गोष्ठ्यां स्वास्थ्यक्षेत्रे क्रियमाणानां विविधानां सकारात्मकपरिष्काराणां विस्तृता समीक्षा कृता। उपवेशने सूचितं यत् 'हिमकेयर-योजनां' सुदृढीकर्तुं तस्यां बहवः गुणात्मकाः परिष्काराः विहिताः। अनेन योजनायां पारदर्शिता सुनिश्चिता भविष्यति तथा भ्रष्टाचारस्य निरोधे साहाय्यं मिलिष्यति। हिमकेयर- योजनान्तर्गतं सर्वकारीय- चिकित्सालयानाम् अभ्यर्थनानां भुक्तिः चिकित्सालयैः प्रयुक्तानाम् उपभोक्ता- सामग्रीणां, वास्तविक- चिकित्सा- व्ययस्य, निर्धारित-संपुट-दराणां (Package Rates) मध्ये यत् न्यूनं भविष्यति, तदाधारेणैव भविष्यति। सर्वकारीयचिकित्सालयैः अभ्यर्थनैः सह वास्तविकव्ययस्य 'बिल'- प्रस्तुतीकरणम् अनिवार्यं भविष्यति। पञ्जीकरणशुल्कं, शय्याशुल्कं, परिचर्या, भोजन- निवास-व्ययः च अधिकाराणां भागः न भविष्यति। एतदतिरिक्तं शल्यकस्य, संज्ञाहरणविदः, वैद्यस्य, परामर्शदातुः च मानदेयं, संज्ञाहरणं, रक्त- आधानं, प्राणवायुः, शल्यकक्ष-शुल्कं, शल्य- उपकरणानां व्ययः, औषधानि, रोगिणः भोजनम् इत्यादीनां प्रतिपूर्ति-अधिकाराः अपि 'बिल' इत्यस्य भागाः न भविष्यन्ति। एतेषां प्रतिपूर्ति- अभ्यर्थनं राशिः राज्यसर्वकारेण हिमकेयर- योजनानुसारं वहनव्ययस्य अतिरिक्तं सर्वकारीय- चिकित्सालयेभ्यः 'आयव्ययके' (Budget) पूर्वमेव उपलभ्यते। एवं प्रकारेण एकस्यैव संपुटस्य कृते सर्वकारः विधिद्वयेन धनं प्रददाति स्म। अस्य युक्तिकरणस्य अनन्तरं या राशिः आयव्ययके सर्वकारीयचिकित्सालयेभ्यः प्रदास्यते, सा हिमकेयर-संपुटस्य भागः न भविष्यति। सर्वकारेण एतेषु मदेषु (Heads) आबंटित- धनराशेः प्रावधानं चिकित्सालयानां स्वायव्ययके एव करिष्यते। हिमकेयर- योजनान्तर्गतं प्रायः ४.३३ लक्षं परिवाराः पञ्जीकृताः सन्ति। अस्याः योजनायाः अन्तर्गतं प्रदेशस्य पञ्जीकृत- सर्वकारीयचिकित्सालयेषु निःशुल्क- चिकित्सायाः प्रावधानम् अस्ति। मुख्यमन्त्रिणा रोगिभ्यः सुलभाः, गुणात्मकाः आधुनिकाश्च स्वास्थ्यसेवाः प्रदातुं विभागं प्रति आवश्यकाः दिशानिर्देशाः अपि दत्ताः।

# हिमकेयर- योजनां पिधातुं सुक्खु-सर्वकारः कामपि सीमां लङ्घयितुं शक्नोति- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- मण्डी।** नेता प्रतिपक्षः जयरामठाकुरः गुरुवासरे सराज- विधानसभाक्षेत्रस्य बालीचौकी- स्थाने काङ्ग्रेस-सर्वकारस्य विरुद्धं प्रदर्शने सम्मिलितः अभवत्। अस्मिन् अवसरे सः 'हिमकेयर' इति योजनां विषयं मत्वा मुख्यमन्त्रिणं सुक्खु-महोदयम् आक्षिप्तवान्। जयरामठाकुरः अवदत् यत् अस्माकं सर्वकारस्य समये आईजीएमसी (IGMC) चिकित्सालये हिमकेयर- योजनान्तर्गतं प्रायः ६० कोटि- रूप्यकाणां भुक्तिः कृता आसीत्, तत्रापि मुख्यमन्त्री सुक्खू महोदयः १२० कोटि-रूप्यकाणां भ्रष्टाचारम् अन्विष्टवान्। अयं सर्वकारः हिमकेयर-योजनां पिधातु (समाप्तुं) कामपि सीमां यावत् गन्तुं शक्नोति। पूर्वं तु विधानसभायां कथितं यत् हिमकेयर- योजनायां ११०० कोटि-रूप्यकाणां घोटाला जातः। यदा वयं तथ्यानि उपस्थापितवन्तः यत् अस्माकं शासने आहत्य ४४१ कोटि- रूप्यकाणाम् एव चिकित्सा अभवत्, तदा मुख्यमन्त्रिणा ज्ञातं यत् तस्य असत्यं प्रकटितं जातम्। ततः सः अवदत् यत् "अस्माभिः एव त्रुटिः जाता, एतत् एकस्याः संस्थायाः प्रकरणम् अस्ति, यत्र १२० कोटि-रूप्यकाणां भ्रष्टाचारः वर्तते।"अधुना प्रश्नः अयं वर्तते यत् यदा एतत् निश्चितं जातं यत् अस्माकं सर्वकारस्य समये आईजीएमसी मध्ये हिमकेयर-माध्यमेन प्रायः ६० कोटि- रूप्यकाणाम् एव भुक्तिः जाता, तर्हि सः १२० कोटि रूप्यकाणां भ्रष्टाचारः कुतः आनीतवान्? अधुना सः पुनः किं असत्यं वदिष्यति, एतत् द्रष्टव्यं भविष्यति।

# प्रतिवर्षं पक्षिणां २९० प्रजातयः शिमलां स्वगृहं कुर्वन्ति, सम्पूर्णे हिमाचले अस्ति एतावती सङ्ख्या




**हिमसंस्कृतवार्ताः- शिमला।**प्रतिवर्षं पक्षिणां २९० प्रजातयः शिमलाजनपदे आयान्ति। एताः प्रजातयः ऋतुकलानुसारं शिमलां प्रति प्रवासं कुर्वन्ति। ग्रीष्मकालस्य ऋतौ १५ तः २० प्रजातयः शिमलायां स्ववासं कुर्वन्ति, शीतकाले च २५ तः ३० प्रजातयः शिमलायाः निम्नक्षेत्रान् प्रति पलायनं कुर्वन्ति। एतदतिरिच्य केचन पक्षिणः तादृशाः अपि सन्ति ये शिमलायां स्थायीरूपेण निवसन्ति। वन्यप्राणीप्रभागः वनविभागश्च पक्षिसंरक्षणाय कार्यं कुर्वन् अस्ति, अस्मिन् विषये इयं सूचना प्राप्ता। 'बर्ड काउण्ट इण्डिया' इत्यस्य अनुसारं शिमलायाम् अद्यपर्यन्तं २९० तः अधिकाः पक्षिप्रजातयः दृष्टाः। सम्पूर्णे हिमाचलप्रदेशे प्रायः ६५० पक्षिप्रजातयः प्राप्ताः सन्ति। अनेन अङ्कणेन अनुमातुं शक्यते यत् शिमलायाः वातावरणं पक्षिणां कृते समृद्धं निवासस्थानम् अस्ति। अत्र पक्षिणः ऋतुकलानुसारं आवागमनं कुर्वन्ति। केचन पक्षिणः स्वस्थानं न परिवर्तयन्ति। एते पक्षिणः तिब्बत-चीन-देशाभ्यां तथा अन्येभ्यः 'ट्रान्स हिमालय' क्षेत्रेभ्यः प्रवासं कृत्वा शिमलाम् आयान्ति। एतेषु स्पैक्टेकल्ड फिन्च, ग्रे हेडिड गोल्ड फिन्च, पिङ्क ब्रॉड रोज फिन्च् इत्यादयः प्रजातयः सम्मिलिताः सन्ति। शिमलायां हिमालयन-बुलबुल, काकः, कपोतश्च इत्यादयः बहवः पक्षिणः स्वस्थानं न परिवर्तयन्ति। शिमला-जल- संग्रहणक्षेत्रे, खेल- हिमालये, मैहली-शोघी उपमार्गं पोटरहिल, मशोबरा, नारकण्डा इत्येतेषु स्थानेषु पक्षिणः बहुसङ्ख्यायां भवन्ति, प्रतिवर्षं च पर्यटकाः तान् द्रष्टुम् आयान्ति। 'बर्ड काउण्ट इण्डिया' इत्यस्य हिमाचलप्रदेशस्य क्षेत्रीयसंयोजकः सन्तोष ठाकुरः अवदत् यत् हिमाचलः पक्षिणां कृते विशालः 'बर्डिङ्ग हॉट स्पॉट्स' अस्ति। सम्पूर्णे भारते प्रायः १३०० पक्षिप्रजातयः लभ्यन्ते, येषु ६५० प्रजातयः केवलं हिमाचले एव प्राप्यन्ते। अस्यां सूच्यां शिमलाजनपदम् अपि अन्तर्भवति।

## पक्षिसंरक्षणाय सामूहिक-प्रयासाः करणीयाः

शिमला-दक्षिणस्य वन्यप्राणीवृत्तस्य अरण्यपालः आईएफएस अधिकारिणी प्रीति भण्डारी अवदत् यत् वन्यप्राणिनां संरक्षणाय समय-समये विविधाः जागरूकताकार्यक्रमाः आयोज्यन्ते। एतेषु आयोजनेषु स्थानीयजनानां सहभागिता सुनिश्चिता क्रियते। क्षेत्र-अधिकारिणः समय-समये वनानां वन्यप्राणिस्थलानां च भ्रमणं कृत्वा वन्यजीवानां संरक्षणं कुर्वन्ति। सा पक्षिप्रेमिणः आह्वानं कृतवती यत् वन्यप्राणिसंरक्षणाय सर्वे मिलित्वा कार्यं कुर्वन्तु।

# जलगावनगरे एकादशकक्षायाः केन्द्रीय-ऑनलाइन-प्रवेशप्रक्रियायाः आरम्भः छात्राणां कृते महाविद्यालये विशेषसुविधाः

**जळगाव-नगरात् प्रतिनिधिः —( अर्जुन शास्त्री )**महाराष्ट्र-शासनस्य शिक्षण-निदेशालयेन शैक्षणिक-वर्षे २०२६–२७ निमित्तं एकादशकक्षायाः केन्द्रीय-ऑनलाइन-प्रवेशप्रक्रिया अधिकृतरूपेण आरब्धा अस्ति। अस्याः प्रक्रियायाः प्रथमः चरणः Part-1 ऑनलाइन-नोंदणी इति, सः दिनाङ्के १० एप्रिल २०२६ प्रातः १० वादने आरभ्यते।अस्मिन् सन्दर्भे जलग्रामे स्थिते स्वामी विवेकानन्द-कनिष्ठ (एम. जे.) महाविद्यालये छात्राणां सुविधार्थं Part-1 आवेदनपत्र-पूर्त्यर्थं विशेषसुविधा उपलभ्यते। येषां छात्राणां समीपे संगणक-इंटरनेट-सुविधा नास्ति, तेषां कृते एषा योजना अत्यन्तं उपयुक्ता भविष्यति। महाविद्यालयस्य शिक्षकैः कर्मिभिश्च मार्गदर्शनस्य अधीनं आवेदनप्रक्रिया सम्पाद्यते।

शासनस्य निर्देशानुसारं अद्य Part-1 आवेदनप्रक्रिया प्रवर्तते। अस्मिन् चरणे छात्रैः स्वीय-व्यक्तिगत-तथ्यानि, शैक्षणिक-विवरणानि तथा आवश्यक-दस्तावेजानां नोंदणी करणीयाः। अनन्तरं द्वितीयः महत्त्वपूर्णः चरणः Part-2 (महाविद्यालय-प्राधान्य-फॉर्म) इति, सः दशमकक्षायाः परिणाम-प्रकाशनानन्तरं प्रारभ्यते। अतः प्रारम्भे एव सूक्ष्मतया आवेदनपत्रं पूरयितुं आवश्यकम्।अद्यतन-वर्षे दशमकक्षा-द्वादशकक्षयोः परीक्षा “कॉपीमुक्त-अभियान” अन्तर्गतं शिस्तबद्धरीत्या सम्पन्ना अभवत्, अतः छात्रेषु उच्चशिक्षणे प्रति उत्सुकता वर्धिता अस्ति। एतादृशे समये एकादशकक्षायाः प्रवेशप्रक्रिया छात्राणां शैक्षणिक-भविष्याय अत्यन्तं महत्त्वपूर्णा मन्यते। अतः सर्वे छात्राः पालकाः च विलम्बं विना Part-1 आवेदनं पूर्णयन्तु इति महाविद्यालय-प्रशासनेन आवाहनं कृतम्।

स्वामी विवेकानन्द-कनिष्ठ-महाविद्यालये कला, वाणिज्य, विज्ञान इति त्रयाणां शाखानां प्रवेशः उपलब्धः अस्ति। कला-वाणिज्य-शाखे मराठी-इंग्रजी-माध्यमयोः चालयेते, विज्ञान-शाखायाः अपि सर्वाः आवश्यक-सुविधाः सन्ति।

महाविद्यालयस्य शैक्षणिक-परम्परा प्रशंसनीया अस्ति। उत्कृष्ट-परिणामाः, सुसज्जित-प्रयोगशालाः, समृद्ध-पुस्तकालयः, अनुभवी-शिक्षकवर्गः तथा छात्राणां सर्वाङ्गीण-विकासे विशेषः बलः—एतानि तस्य वैशिष्ट्यानि सन्ति। अपि च करिअर-मार्गदर्शनम्, स्पर्धा-परीक्षा-तैयारी, शिस्तबद्ध-पर्यावरणम् तथा सुरक्षित-परिसरः इत्यादिभिः छात्रेभ्यः गुणवत्तापूर्णं शिक्षणं प्रदीयते।

# निर्वाचनम् 2026: त्रिषु राज्येषु मतदानस्य कीर्तिमानम्, असमस्य इतिहासे प्रथमवारं 85.38 प्रतिशतं मतदानम्



देशस्य द्वयोः राज्ययोः असम-केरलयोः तथा च केन्द्रशासितप्रदेशे पुडुचेर्यां गुरुवासरे मतदानस्य सर्वे कीर्तिमानाः भग्नाः अभवन्। निर्वाचन-आयोगानुसारं रात्रौ अष्टवादनपर्यन्तं असमराज्ये 85.38 प्रतिशतं मतदानम् अभवत्। असमस्य इतिहासे एषः सर्वाधिकः मतदानस्य अङ्कः अस्ति। एवमेव केरले गतेषु 49 वर्षेषु द्वितीयं सर्वाधिकं मतदानम् अभवत्, अत्र 78.01 प्रतिशतं जनाः मतदानं कृतवन्तः। 1977 तमे वर्षे केरले सर्वाधिकं 79.2 प्रतिशतं मतदानम् अभवत्। अपरपक्षे पुडुचेर्यां 89.81 प्रतिशतं मतदानं जातम्।

मतदानकाले असमराज्ये निर्वाचनसम्बन्धिन्यां हिंसायां प्रायः 30 जनाः क्षताः अभवन्, सप्त जनाः च निगृहीताः (आरक्षिताः)। श्रीभूमिमण्डलस्य 'पथारकण्डी' स्थाने काङ्ग्रेस-भाजपा समर्थकानां मध्ये सङ्घर्षे प्रायः 25 जनाः क्षताः, द्वयोः अवस्था गभीरा अस्ति। पुडुचेर्याः 'मन्नादिपेट' क्षेत्रे मतदानकेन्द्रे काङ्ग्रेस-भाजपा समर्थकानां मध्ये कलहः अभवत्। आरक्षकैः समूहे दण्डप्रहारः (लाठीचाज) कृतः।

पुडुचेर्याः मुख्यमन्त्री रंगास्वामी मतदानार्थं द्विचक्रियावाहनेन मतदानकेन्द्रं प्राप्तवान्। केरले पूर्वप्रतिरक्षामन्त्री काङ्ग्रेसनेता च ए.के. एण्टनी महोदयः तिरुवनन्तपुरमे मतदानं कृतवान्। असमस्य मुख्यमन्त्री हिमन्ता बिस्व सरमा गुवाहाटी-नगरे मातुः कामाख्यायाः मन्दिरे पूजनं कृतवान्। ततः परं पत्न्या सह 'जालुकबाड़ी' क्षेत्रे मतदानं कृतवान्। एतेषां त्रयाणां राज्यानां निर्वाचनपरिणामाः मई-मासस्य चतुर्थे दिनाङ्के आगमिष्यन्ति।

# परमाणु-भीति-सम्मुखं न नंस्यति भारतम्, CDS जनरल-अनिल-चौहान-महोदयस्य पाकिस्तानाय संचेतना



बेङ्गलूरु। 'चीफ ऑफ डिफेंस स्टाफ' (CDS) जनरल अनिल चौहानः गुरुवासरे उक्तवान् यत् देशः परमाणु-भीति-सम्मुखं (Nuclear Blackmail) न अवनमिष्यति। तेन स्पष्टीकृतं यत् भारतं परमाणु-छायायाः मध्ये अपि पारम्परिक-सैन्य-अभियानं निरन्तरं कर्तुं पूर्णतः सज्जम् अस्ति। भारतस्य दृष्टिकोणे एतत् 'नूतन-सामान्यम्' (New Normal) इति कथयन् जनरल-चौहानः अवदत् यत् देशस्य सङ्कल्पः उच्चतमस्तरे स्पष्टरूपेण प्रकटितः अस्ति।

सः 'ऑपरेशन सिन्दूर' इत्यस्य अनन्तरं प्रधानमन्त्रिणः नरेन्द्रमोदिनः तां टिप्पणीं स्मृतवान् यत् भारतं परमाणु-सङ्कटेभ्यः न भेष्यति। तेन उक्तम्, "अस्माभिः आक्रमणस्य अनन्तरस्य वातावरणे अपि अभियानं चालयितुं सज्जैः भवितव्यम्। पारम्परिक-परमाणु-क्षेत्रयोः मध्ये सम्बन्धः इदानीं दृढतया स्थापितः अस्ति।" जनरल-चौहानः अस्मिन् विषये बलं दत्तवान् यत् परमाणु-शस्त्राणि युद्धं कर्तुं न अपितु निवारणस्य (Deterrence) साधनानि सन्ति। सः अवदत्, "निवारणम् एकं मानसिक-क्रीडा (Mind game) अस्ति। परमाणु-शस्त्राणि स्वयमेव किमपि क्षेत्रं न सन्ति, अपितु एतानि मानसिक-क्रीडायाः भागः सन्ति, यानि निर्णयान् व्यवहारं च प्रभावितं कुर्वन्ति।" सः पारम्परिक-सैन्य-योजनासु एतेषां महत्वपूर्णं प्रभावम् अपि अङ्गीकृतवान्।

जनरल-चौहानः उक्तवान् यत् भारतं पारम्परिक-सीमाभ्यः परं जायमानानां सङ्घर्षाणाम् अपि कृते आत्मानं सज्जं करोति। युद्धस्य परिवर्तनशीलां प्रकृतिं चर्चयन् सः अवदत् यत् सैन्य-नागरिक-भूमिकानां मध्ये अन्तरं वेगेन न्यूनं भवति। अन्तरिक्ष-साइबर-कृत्रिमबुद्धि (AI) तथा सूचनायुद्धसदृशेषु क्षेत्रेषु भविष्यस्य सङ्घर्षाणां कृते एका 'हाइब्रिड-संरचना' आवश्यकी भविष्यति, या सशस्त्रबलैः सह नागरिक-विशेषज्ञतायाः एकीकरणं कुर्यात्।

सीडीएस-महोदयेन अन्ते उक्तं यत् यथा यथा युद्धं थल-जल-नभ-क्षेत्रेभ्यः अग्रे गत्वा तन्त्रज्ञानस्य मानवीय-बोधस्य च क्षेत्रे विस्तारं करोति, भारतस्य सज्जता पारम्परिक-शक्तिं नागरिक-एकीकरणेन सह योजयितुं क्षमतायां निर्भरा भविष्यति।

# दूरीभविष्यति LPG-इन्धनस्य न्यूनता, 15400 टनपरिमितं पाकवाष्पं (रसोई गैस) नीत्वा मुम्बईं प्राप्तं 'ग्रीन आशा' पोतम्



मुम्बई। मुम्बई-नगरस्य समीपे स्थितं जवाहरलाल नेहरू पोर्ट अथॉरिटी (JNPA) गुरुवासरे 'ग्रीन आशा' इति नामकस्य भारतीयध्वजाङ्कितस्य एलपीजी-पोतस्य स्वागतं कृतवान्। एतेन पोतेन रणनीतिकदृष्ट्या संवेदनशीला 'होर्मुज़' जलसन्धिः सफलतापूर्वकं पारिता। एषः पोतः बीपीसीएल-आईओसीएल (BPCL-IOCL) द्वारा सञ्चालिते लिक्विड-बर्थ (द्रव-स्थानके) लङ्गरं निक्षिप्तवान् अस्ति। एकेन आधिकारिक-कथनेन अनुसारं, अस्मिन् पोते 15,400 टनपरिमितं द्रवीकृतं पेट्रोलियम-वाष्पं (LPG) पूरितम् आसीत्। पोतः, तत्रस्थं वस्तु (माल) तथा च चालकदलस्य प्रत्येकं सदस्यं पूर्णतया सुरक्षितं वर्तते। अन्तर्जालपुटे (Online) दृश्येषु पोतः पत्तने लङ्गरं निक्षिप्तः दृश्यते, यत्र चालकदलस्य सदस्याः हस्तसञ्चालनेन अभिवादनं कुर्वन्ति। एषा घटना पश्चिम-एशियायाम् प्रवर्तितायाः सूक्ष्मायाः युद्धविराम-स्थितेः मध्ये सम्मुखीभूता अस्ति।

## "लौकिकन्यायकोशः"

## "बहुनुग्रहन्यायः"

बहवो जनाः एकत्र समागताश्चेत् सर्वेषां सामूहिकशक्तेः महान् प्रभावो भवति इति भावः। यथा-

"बहूनामप्यसाराणां मेलनं कर्मसाधकम्। तृणैः संपाद्यते रज्जुर्यया नागोऽपि बध्यते।।

{सुभाषितम्}

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। मया एका विचित्रा वार्ता श्रुता। अमेरिकादेशे एकया न्यायाधीशया न्यायालयस्य कार्याणि त्यक्तानि। सा पुनर्निर्वाचनस्य प्रचारे अतीव व्यग्रा अस्ति। अतः तया न्यायालये उपस्थितिः न कृता।

**काव्या-** नमस्ते नन्दिनि। एतत् तु अतीव हास्यास्पदम्! न्यायाधीशपदे स्थितया अपि तया स्वकार्यं न कृतम्! अन्या वार्ता अपि विचित्रा अस्ति। एकेन प्रबन्धकेन एकस्य कर्मकरस्य रुग्णतावकाशः अस्वीकृतः। तेन प्रबन्धकेन चिकित्सालयस्य प्रमाणपत्रं पृष्टम्। तत् विना अवकाशः न दत्तः।

**नन्दिनी-** अहो! एषः प्रबन्धकः अतीव कठोरः। रुग्णे कर्मकरे अपि तेन विश्वासः न कृतः। परन्तु अन्यस्मिन् कार्यालये एकया संस्थया स्वदोषः अङ्गीकृतः। एकेन नूतनकर्मकरेण त्रिभिः सप्ताहैः एव उद्योगः त्यक्तः। तेन नूतनेन जनेन कार्यालये आत्मा भारभूतः अनुभूतः। तस्मै सम्यक् प्रशिक्षणं न दत्तम्।

**काव्या-** अतीव खेदजनकम्। सम्यक् मार्गदर्शनं विना तेन कष्टम् अनुभूतम्। अन्तिमा वार्ता अपि कार्यालयात् एव अस्ति। अमेरिकादेशे एकया संस्थया कर्मकराः कार्यालयं प्रति पुनः आकृष्टाः। संस्थया तेभ्यः द्विसहस्रमुद्राणां स्वास्थ्यधनं दत्तम्। एतेन उपायेन कर्मकराः आगतवन्तः सन्ति।

